श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।

वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

॥ श्री अहोबिल नारसिंह स्तोत्रम् ॥

This document has been prepared by*

Sunder Kidambi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness *śrīmad āṇḍavan* of *śrīraṅgam*

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

॥ श्री अहोबिल नारसिंह स्तोत्रम् ॥

लक्ष्मीकटाक्षसरसीरुहराजहंसं
पक्षीन्द्रशैलभवनं भवनाशमीशम्।
गोक्षीरसार घनसारपटीरवर्णं
वन्दे कृपानिधिमहोबलनारसिंहम्॥ १॥

आद्यन्तशून्यमजमव्ययमप्रमेयं
आदित्यचन्द्रशिखिलोचनमादिदेवम्।
अब्जामुखाब्जमदलोलुपमत्तभृङ्गं
वन्दे कृपानिधिमहोबलनारसिंहम्॥ २॥

कोटीरकोटिघटितोज्ज्वलकान्तिकान्तं
केयूरहारमणिकुण्डलमण्डिताङ्गम्।
चूडाग्ररञ्जितसुधाकरपूर्णबिम्बं
वन्दे कृपानिधिमहोबलनारसिंहम्॥ ३॥

वाराहवामननृसिंहसुभाग्यमीशं
क्रीडाविलोलहृदयं विबुधेन्द्रवन्द्यम्।
हंसात्मकं परमहंसमनोविहारं
वन्दे कृपानिधिमहोबलनारसिंहम्॥ ४॥

मन्दाकिनीजननहेतुपदारविन्दं
वृन्दारकालयविनोदनमुज्ज्वलाङ्गम्।
मन्दारपुष्पतुलसीरचिताङ्घ्रिपद्मं
वन्दे कृपानिधिमहोबलनारसिंहम्॥ ५॥

तारुण्यकृष्णतुलसीदलधामरम्यं
धात्रीरमाभिरमणं महनीयरूपम्।

www.bhaktipath.com

मन्त्राधिराजमथदानवमानभङ्गं
वन्दे कृपानिधिमहोबलनारसिंहम्॥ ६ ॥

॥ इति श्री अहोबिल नारसिंह स्तोत्रं सम्पूर्णम्॥

www.prapatti.com